**सौभागिनेय** पु० सुभगाया अपत्यम् ढक् इनङ् च द्विपद-वृद्धिः । १सुभगापुत्रे । २तत्कन्यायां स्त्री ङीप् ।

**सौभाग्य** न० सुभगाया भावः ष्यञ् द्विपदवृद्धिः । १पतिप्रियत्वे तदर्थं व्रतं सौभाग्यव्रत व्रतशब्दे ५०६८ पृ० दृश्यम । सुभगायै सुभगाय वा हितं ष्यञ् । २सिन्दूरे ३टङ्कणे च राजनि० । विष्कम्भादिषु मध्ये ४चतुर्थे योगे पु० ज्यो०त० ।

**सौभाग्यचिन्तामणि** पु० औषधभेदे । तल्लक्षणं सारकौ० उक्तं यथा "सौभाग्याम्लतजीरपञ्चलवणव्योषाऽभयाग्निनलानि-स्यन्द्राभ्रकशुद्धगन्धकरसानेकीकृतान् भावयेत् । निर्गुण्डी-युगभृङ्गराजकवृषापामार्गपत्रोत्थवत् प्रत्येकं स्वरसेन सिद्धवटिका घ्नन्ति त्रिदोषोदयम् । येषां शीतमतीव देहमखिलं स्वेदद्रवाद्रींकृतं निद्रा घोरतरा समस्तकरण-व्यामोहमूढं मनः । शूलश्वासबलासकासमहितं मूर्च्छा-रुचिं तृड्ज्वरं तेषां वै परिहृत्य जीवितमसौ स्वह्णाति सत्योत्सुखात्" । [ऐन्द्रजालिके हारा० ।

**सौभिक** पु० सोभं कामचारिपुरं तद्गमने शिल्पमस्य ठक् ।

**सौमनस्य** न० सुमनसो भावः ष्यञ् । प्रशस्तचित्तत्वे तत्र हितं अण् । २श्राद्धे दत्तस्य पुष्पस्य प्रसादयुक्तचित्त-साधनत्वे "सौमनस्यमस्तु" आह्वमन्त्रः ।

**सौमनस्यायनी** स्त्री सौमनस्यमयतेऽनया अय-ल्युट् ङीप् ६त० । १मालत्याम् २तत्कलिकायाञ्च त्रिका० ।

**सौमिकी** स्त्री सोमस्तद्दीक्षा प्रयोजनमस्य ठक् ङीप् । सोमयागार्थदीक्षणीयेष्टौ हेमच० । [लक्ष्मणे शब्दच० ।

**सौमित्र(त्रि)** पु० सुमित्रायां भवः अण् बाह्वादि० इञ् वा

**सौमेधिक** पु० सुमेधया निर्वृत्तः ठक् । १सिद्धियुते हारा० । २शोभनमेधायुते च त्रि० ।

**सौम्य** त्रि० सोमो देवताऽस्य तस्येदं वा ट्यण् । १सोमदेवताके २हविरादौ २तत्सम्बन्धिनि । टित्त्वात् स्त्रियां ङीप् । सोम इव शाखादित्वात् य स्वार्थे अण् । ३मनोहरे ४प्रियदर्शने ५अनुग्रे च त्रि० मेदि० ६बुधे पु० अमरः । ततः स्वार्थिकाण्प्रत्ययाभावे सोम्योऽप्युभयत्र । "सदेव सोम्येदमग्र आसीत्" इति श्रुतिः । ज्योतिषोक्ते ७शुभ-ग्रहे ८वृषादिसमराशौ च ९उडुम्बरवृक्षे राजनि० । १०भास्वरे त्रि० धरणिः । ११सोमपायिनि विप्रे पु०शब्दमा० अष्टादशद्वीपमध्ये १२द्वीपभेदे पु० "गन्धर्वी वरुणः सौम्यः वहुलः कङ्क एव च । कुमुदश्च कसेरुश्च नागो भट्टारक-स्तथा । चन्द्रेन्दुमलयाः शङ्खयवाङ्कगभस्तिमान् । तास्त्रपर्णश्च कुमारी च तत्र द्वीपा दशाष्टभिः" शब्दमा० । १३सौम्यकृच्छ्रे व्रतभेदे । "अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रोऽतिकृच्छ्रकः" प्रा० त० । सौम्यकृच्छ्रशब्दे दृश्यम् ।

**सौम्यकृच्छ्र** पु० कर्म० सोमदेवताके कृच्छ्रसाध्ये व्रतभेदे । "पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम् । एकैकमुप-वासश्च कृच्छ्रः सौम्योऽयमुच्यते" याज्ञ० । पिण्याकः खलिः आचामः भक्तमण्डः । एष षड्हसाध्यः प्रा०वि० ।

**सौम्यगन्धी** स्त्री सौम्यः अनुग्रः गन्धो यस्याः गौरा० ङीष् । शतपत्त्रयाम् राजनि० ।

**सौम्यग्रह** पु० कर्म० । ज्योतिषोक्ते पूर्णचन्द्रपापायुतबुध-गुरुशुक्ररूपे शुभग्रहे "अर्क्कोनेन्द्वर्कसौरारा: पापाः सौम्यास्तथाऽपरे । पापयुक्तो बुधः पापो राहुकेतू च पापकौ" ज्यो० त० । [तद्यात्वम् ।

**सौम्यधातु** पु० कर्म० । कफे राजनि० तस्य सोमजातत्वात्

**सौम्या** स्त्री सोमो देवताऽस्य ट्यण् सोम इव शाखा० य स्वार्थे अण् वा । १दुर्गायां देवीमा० । २महेन्द्रवारुण्यां ३रुद्रजटायां ४महाज्योतिष्मत्यां ५महिषवल्लयां ६गुञ्जायां ७शालपर्ण्यां ८ब्राह्म्यां ९शठ्यां १०मल्लिकायां च राजनि० मृगशिरोनक्षत्रशिरःस्थासु पञ्चतारकासु विश्वः ।

**सौर** पु० सूरस्य इदम् सूरो देवताऽस्य वा अण् । १सूर्य-पुत्रे शनैश्चरे २यमे च । ३सूर्यदेवताके त्रि० स्त्रियां ङीप् । सूरेण निर्वृत्तः अण् । एकैकराशौ तदंशेषु वा सूर्यगतिसाध्ये ४दिनमासादौ त्रि० । "अध्यायनस्य पङ्चारकर्म सौरेण मानेन सदाऽध्यवस्येत्" ज्यो०त० । "विवाहादौ स्मृतः सौरः" इति स्मृतिः । ५उडुम्बरवृक्षे पु०राजनि० ६सूर्योपासके त्रि० ७गुरुभेदे "गौड़ाः शाक्तो द्भवाः सौराः मागधाः कोङ्कणास्तथा । कोशलाश्च दशा-र्णाश्च गुरवः सप्त मध्यमाः" तन्त्रसा० ।

**सौरज** पु० सूरस्यायम् अण् सौर आलोकस्ततो जायते जन-ड । तुम्बुरुवृक्षे राजनि० ।

**सौरभ** न० सुरभेर्भावः अण् । १सद्गन्धे सौरभमस्यास्ति अच् सुरभिरस्यास्ति अण् वा । कुङ्कुमे त्रिका० २बोले च राजनि० ।

**सौरभेय** पु० सुरभेरपत्यम् ढक् । १गवि स्त्रियां ङीप् । "सौरभेयीभ्य एव च" गोदानमन्त्रः । तस्या इदम् ढक् । २सुरभिसम्बन्धिनि त्रि० ।

**सौरसेय** पु० सुरसाया अपत्यम् ढक् । स्कन्दे शब्दमा० ।

**सौराष्ट्र** पु० सुष्ठु राष्ट्रमस्यास्ति प्रज्ञा० अण् । (सुरट) १देश-भेदे जटा० । सुराष्ट्रे भवः अण् । २सुराष्ट्रदेशभवे त्रि०